Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५०३

Title गुरु कवच स्तोत्रं

Author

Extent ४ Age

Subject तन्त्रम्

𑆓𑆶𑆫𑆶𑆑𑆮𑆖𑆱𑇀𑆠𑆾𑆠𑇀𑆫𑆩𑇀

𑇔𑇕𑇐𑇓

4503
F=4

गुरुकवच

॥गु.क.॥
॥१॥

॥श्रीगणेशाय नमः॥ श्रीगुरवे नमः॥ पार्वत्युवाच॥ ॐ नमो देवदेवेश भक्तानुग्रहकारक॥ कुलधर्म
रताधीशनानेषां सिद्धिकारणं॥१॥ ब्रूहि मे कृपया शंभो भोनवधीनिमेमोपरी॥ साधकानां हितार्थाय भु
क्तिमुक्तिप्रदायकं॥२॥ ईश्वर उवाच॥ शृणु देवी प्रवक्ष्यामी गुह्याद्गुह्यतरं महत्॥ लोकोपकारकं देवी
श्रीगुरोः कवचं शुभं॥३॥ अघघप्रश्नतिकस्या विनस्यात्कवचं गुरोः॥ देविकाचहवः संतीमंत्राः साध
नेभ्यसमाः॥४॥ न तेषां जायते सिद्धिर्मंत्रैर्वीच कल्पजनै॥ गुरुर्विधानात्कवचं महात्याकिंयते जपः॥५॥ अ
पाश्वमोभवेत्तस्य न सिद्धिं चैत्र कल्पजने॥ गुरुपादयुरस्त्रस्य प्राप्तनेकवचं शुभं॥६॥ नराणां मंत्रस्य यंत्र
स्य सिद्धिर्भवति नेत्रगणात्॥ सुगोप्यं च प्रयत्नेन नन वक्तव्यं वरानने॥७॥ ॐ अस्य श्रीगुरुकवचस्तोत्रम
हामात्रा मंत्रस्य श्रीपरमशिवो ऋषिः॥ श्रीगुरुदेवता वैराट् छंदः॥ श्रीशिवादि गुरुर्देवता॥ ईं ह्सौं ॥राम॥
हंसः हमलवरयं बीजानि॥ ईं सहृ हमलवरंयी शक्तिः॥ हंसः॥ सोहं कीलकं॥ श्रीसमस्तगुरुमंडल ॥१॥

प्रीत्यर्थे ॥ श्रीमद्गुरुकवचंमहामंत्रजपेविनियोगः ॥ अथ करन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जु
नीभ्यां नमः ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ॐ ह्रौं कनिष्ठिकाभ्यां नम ॥ ॐ ह्रः करतलकरपृ
ष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ ॐ ह्रां हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ ह्रूं शिखायै वषट् ॥ ॐ ह्रैं कव
चाय हुं ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥ ॐ ह्रः अस्त्राय फट् ॥ इति हृदयादिषडंगः ॥ ॐ स्वगुरुं मंत्रेष्टदेवतां चैन्ना
मपूर्वकं ध्यायेत ॥ सिद्धौघसिद्धिनघं गुरुमस्तिरूपं संसारतारहस्मामनं हि भुजं त्रिनेत्रं ॥ वामांगभाक्तिस
कलामरलेविभूषं ध्यात्वा जपेत्सकलसिद्धिफलप्रदं च ॥१॥ इति ध्यात्वा मानसोपचारैः संपूज्य ॥ ॐ अं गु
आत्मने पाद्यं ० ॥ ॐ जं ज्योतिरसात्मने अर्घ्यं ॥ ॐ अमृतात्मने स्नानं ॥ ॐ विद्यात्मने वस्त्रं ० ॥ मी ॥ इति गंधं ॥ ॐ
ऐं ह्रीं श्रीं हं आकाशात्मने पुष्पं सपुजं ॥ इति पुष्पं ॥ ॐ ऐं ह्रीं श्रीं यं वायव्यात्मने धूपं ० ॥ इति धूपं ॥ ॐ ऐं ह्रीं
श्रीं रं तेजात्मने दीपं ० ॥ इति दीपं ॥ ॐ ऐं ह्रीं श्रीं वं अमृतात्मने [illegible] सिके षड्रसपक्वान्नं महानैवेद्यं स० ॥ इति

॥गु. क.॥
॥२॥

नैवेद्यं० ॥ ऐं ह्रीं श्रीं संशान्त्यात्मने तां वलं० ॥ इतिनां वलं० ॥ ऐं ह्रीं श्रीं अनन्तात्मने नीराजनं ॥ इति नी
राजनं ॥ इति पूजाविधिः ॥ अथ ध्यानं ॥ श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं ॥ सिद्धौघं बटुकत्रयं
पदयुगं दूतीक्रमं मण्डलं ॥ वीरेन्द्राष्टचतुष्कषष्टिनवकं वीरावलीपंचकं श्रीमन्मालिनीमन्त्रराज
सहितं वंदे गुरोर्मण्डलं ॥ १ ॥ इति ध्यानं ॥ ततः कवचं पठेत् ॥ ऐं प्रकाशानंदनाथाख्यः शिरो मे रक्षतु वेत्स दा
परशिवानंदनाथो भाले रक्षतु सर्वदा ॥ १ ॥ परापरानंदनाथो भ्रुवो मध्ये च रक्षतु ॥ कौलेश्वरानं
दनाथो नेत्रौ मे पातु सर्वदा ॥ २ ॥ शुक्लेश्वरानंदनाथो श्रोत्रौ मे रक्षतु स्वयं ॥ कुलेश्वरानंदनाथो नासि
कायां च रक्षतु ॥ ३ ॥ कामेश्वरानंदनाथो मुखं पातु सदं तथा ॥ दिव्यौघः स्वयं मे देहं पातु सर्वं शिरः
सदा ॥ ४ ॥ कंठादिनाभिपर्यंतं सिद्धौघो गुरवः प्रिये ॥ श्रीभोगानंदनाथो मे पातु दक्षिणबाहुकं ॥ ५ ॥ क्ली ॥राम॥
नानंदनाथगुरुः रक्षतु मे वामबाहुकं ॥ समयानंदनाथाख्यः स्तनेहृदये वतु ॥ ६ ॥ सहजानंदनाथो ॥२॥

2

मेकदिनाभीचरक्षतु ॥ एषु स्पद्मानेषु सिद्धौघा रक्षेत्सर्वसंधिषु ॥ ७ ॥ आधारे पातु मानौघा गुरवः कु
लनायकैः ॥ गगनानंदनाथश्च स्वेवं तु लिंगमंडले ॥ ८ ॥ विमलानंदनाथगुरुर्मेमगुस्वं च रक्षतु ॥ विमला
नंदनाथश्च जानुन्मे रक्षेत्सदा ॥ ९ ॥ मदनानंदनाथश्च जंघयोः पातु सद्गुरुः ॥ भुवनानंदनाथश्च गुल्फ
योः पातु सर्वदा ॥ १० ॥ लीलानंदनाथगुरुः पादपृष्ठे च रक्षतु ॥ स्वात्मानंदगुरुर्मे पादांगुलीश्च रक्षतु ॥
११ ॥ कल्लोलानंदनाथश्च रक्षेत्पादतले सदा ॥ इत्येवं मानवौघश्च ममसेन्नाभ्यादिपादयोः ॥ १२ ॥ गुरुर्मे
रक्षेत्सर्वत्र सलिले परमो गुरुः ॥ परात्परगुरुस्त्वग्ने रक्षेत्त्विवचवत्र मे ॥ १३ ॥ परमेष्ठिगुरुश्चैव र
क्षेद्वायुमंडले ॥ दिव्यादिगुरवः साक्षादाकाशे रक्षयेत्सदा ॥ १४ ॥ इन्द्रो गुरुः पातु पूर्वे वाग्नेयां मतिमान्
गुरुः ॥ दक्षे यमो गुरुः पातु नैरृत्यां गुरुर्नैरृते ॥ १५ ॥ वरुणो गुरुः पश्चिमे वायव्यां मारुतो गुरुः ॥ उत्तरे गुरुर्ध
नदो ईशान्यां ईश्वरो गुरुः ॥ १६ ॥ ऊर्ध्वं पातु गुरुर्ब्रह्मा ह्यनंतो गुरुरव्ययः ॥ एवमिंद्रादयो रक्षां कुर्वंतु गुरवो

मम ॥ १७ ॥ स्थिरसः पादपर्यंतं पावनुद्विज्योपत्स्त्रिदुवे ॥ मानवो ध्याप्तु गुरवः पिंडं च व्यापकस्तथा ॥ १८ ॥ गु
रुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ॥ गुरुरेक परं ब्रह्म तस्मै श्री गुरवे नमः ॥ १९ ॥ परानंदः परंब्रह्मं च प
रं पूर्णप्रकाशकं ॥ परंज्योतिः परंतत्वं परमहंसपरात्परं ॥ २० ॥ ईश्वरोवाच ॥ श्रृणु देवि परंतत्वं गु
ह्याद्गुह्यतमं ॥ दुर्लभं देवदैत्यानां सर्वपापनिवारकः ॥ २१ ॥ करुणात्मा कृपासिंधु गुप्तिश्चत्वचिंताम
णिः सदा ॥ विमलश्च चतुर्वेदे मंत्रशास्त्रमनेकधा ॥ २२ ॥ पिबंति सारतत्वज्ञास्तत्क्र मुद्रूप्यपंडिता
ह्वत्यसारममृतं मुनीमोरूपरायणं ॥ २३ ॥ आनंदकारलोज्ञानशांतरूपाय वै नमः ॥ नमस्ते गुरुदे
वाय परमानंदरूपिणे ॥ २४ ॥ दुःखकायमनोकायवद्धीरूपाय वै नमः ॥ परमानंदरूपाय विश्व
रूपाय वै नमः ॥ २५ ॥ नमः पूर्णप्रकाशाय विश्ववीर्याय वै नमः ॥ विश्वाधराय वैनुमं विश्वाक ॥ राम ॥
राय वै नमः ॥ २६ ॥ नमस्तेऽक्षमनंताय आद्यनंताय वै नमः ॥ निरंजननिराकार नमः संसारपा ॥ ३ ॥

त्मने ॥२७॥ स्तोत्रं वै गुरुदेवस्य गुरुणानुत्तत्तरं परं ॥ दीपकं मंत्रलं त्राणं सर्वकिल्बिषनाशनं ॥२८॥ सर्व
विषादहरणं सर्वरोगादिनाशनं ॥ व्याघ्रचौरादिशमनं मारीभयविनाशनं ॥२९॥ संग्रामे शत्रुसंक
टे सागरे पर्वते वने ॥ श्मशाने दुष्टसंघे च भयनाशकरं परं ॥३०॥ एतत्स्वठने नित्यं पाठयेद्वा समा
हितः ॥ मुच्यते सर्वपापेभ्यो निर्भयो जायते नरः ॥३१॥ अष्टौवान्तपसा साधुर्योगी प्रोजायते चिरान्
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं ॥३२॥ लभते सर्वसिद्धिं च त्रैलोक्यं वशमानयेत् ॥ न पुनः प्रप्य
ते योनि गर्भवासो न जायते ॥३३॥ साध्यं नवतिसद्गुरुः मुच्यते संसारसंकटात् ॥ सर्वसिद्धिप्रदो भू
त्वा गुरुसान्निध्यतां व्रजेत् ॥३४॥ महैकवाक्यं तं मंत्रं पुरश्चर्याविधिस्मृतः ॥ सकलं सिद्धिमाप्नोति गुरो
पादानुचिंतनात् ॥३५॥ गुरुर्माता पिता भ्राता सखा चैव सहोदरः ॥ नत्वं गुरोपरं नास्ति सर्वदेवमयो मत ॥३६॥
पठंति वेदाश्चत्वारो मंत्रशास्त्रमनेकधा ॥ गुरुमंत्रविहीनानां सिद्धिर्नैवोपजायते ॥३७॥ सर्वत्र गुरुरू

॥ गु॰ क॰ ॥ येन दृश्यते साधको नमः ॥ स्वात्मानं गुरुरूपत्वं ध्यात्वा वं मंत्रविद्भवेत् ॥ ३८ ॥ इत्येवं गुरुकवचं त्रैलोक्ये
॥ ४ ॥ पि दुर्लभं ॥ न च प्रीतामकां ख्यातं न कस्य कथितं प्रिये ॥ ३९ ॥ र आकाले पठेद्यस्तु जपकाले विशेषतः ॥ नलो
के दुर्लभं देवी भुक्तिमुक्तिप्रदायकं ॥ ४० ॥ सर्वमंत्रफलं तस्य सर्वयंत्रफलप्रदं ॥ सर्वतीर्थप्रदं देवी पठने
कवचं गुरोः ॥ ४१ ॥ अष्टगंधेन भूर्जे च लिखित्वेन्मंत्रसंयुतं ॥ कवचं गुरुपादुकां च भक्त्या च प्रभुभवास
रे ॥ ४२ ॥ पूजयेद्धूपदीपाद्यैः सुधापिष्टान्नसंयुतं ॥ नवैवन्मुरु मंत्रेण साधकः शुद्धचेतसा ॥ ४३ ॥ धार
येत्कवचं देवी ग्रहभूतभयं नहि ॥ पठितव्यं त्रिकालेहि समुक्तो भवबंधनात् ॥ ४४ ॥ इत्येवं गुरुकवचं प
रात्परतरं दिव्यो घस्मिद्योपवान् ॥ मानेपाः कमलस्तत्वापरगुरोसा स्राद्गुरोसंस्थितं ॥ भक्त्यादेशिक
मंत्रराजसहितं चिन्तान्तुजे श्रीगुरुं ॥ ध्यात्वा श्रीरचलंकवित्वमपरं मंत्रेच मुक्तिं लभेत् ॥ ४५ ॥ इति ॥ राम ॥
श्रीरुद्रयामले ॥ उमामाहेश्वरसंवादे मंत्रसारोद्धारे श्रीसद्गुरुकवचं स्तोत्रं संपूर्णं ॥ शुभं भूयात् ॥ ॥ ८ ॥